**सञ्ज** पु॰ सम्+जन-ड । चतुर्मुखे १ब्रह्मणि २शिवे च मेदि॰ ३काम्यां स्त्री त्रिका॰ ।

**सञ्जय** पु॰ भारतप्रसिद्धे धृतराष्ट्रसारथिभेदे ।

**सञ्जवन** न॰ सम्+जु-युच् । परस्पराभिमुखतया स्थिते चतुःशाले गृहे अमरः ।

**सञ्जीवन** न॰ सम्+जीव-ल्युट् । १चतुःशालगृहे शब्दर॰। २सम्यक्प्राणधारणे च । संजीवयति सम+जीव-णिच्-ल्युट् । ३ओषधीभेदे स्त्री ङीप् ।

**सट** न॰ स्त्री सट-अच् पृषो॰ ठस्य टः । १व्रतिनां केशसङ्घाते २जटायाम् शब्दर॰ । ३शिखायां ४सिंहादेः केशरे च मेदि॰ "सटच्छटाभिन्नघनेनेति" माघः । [ङीष् ।

**सटाङ्क** पुंस्त्री॰ सटा अङ्को यस्य । सिंहे शब्दर॰ स्त्रियां

**सटि(टी)** स्त्री सठ-इन् वा ङीप् पृषो॰। १शट्यां शब्दरत्ना॰ स्वार्थे क । २गन्धपत्त्रवृक्षे राजनि॰ । सठ-इन् ङीप् । पृषो॰। सटीत्यत्र । ठान्तः तत्रार्थे राजनि॰ ।

**सट्वा** स्त्री सठ-व पृषो॰ । १पक्षिभेदे २वाद्ये संक्षिप्तसा॰ ।

**सठ** असठार्थे गतौ संस्कारे असंस्कारे च चुरा॰ उभ॰ सक॰ सेट् । साठयति ते घोपदेशत्वमेव न्याय्यम् ।

**सणसूत्र** न॰ शणसूत्र+पृषो॰ । शणसूत्रे रायमुकुटः ।

**सण्डिश** पु॰ संदंश+पृषो॰। सन्दंशे (साँड़ाशि) "सण्डिशैरपकृष्यन्ते नरैर्यांस्यैर्मुखान्ततः" मार्कण्डेयपु॰ १४अ॰।

**सण्डीन** न॰ सम्+डी-क्त । पक्षिणां सङ्गत्य गमनरूपे गतिभेदे अमरः ।

**सत्** त्रि॰अस-शतृ । १सत्ये २साधौ ३पूजिते ४धीरे ५प्रशस्ते ६विद्यमाने च अमरः । स्त्रियां ङीप् । सा च ७पतिव्रतायां स्त्रियां ८दक्षकन्याभेदे "सती सती योगविसृष्टदेहेति" कुमारः । ९सौराष्ट्रमृदि हेमच॰ १०ब्रह्मणि न॰ "ओंतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति गीता । ११आदरे अव्य॰ "सदसती आदरानादरयोरिति" पाणिनिः उप॰स॰"सत्कृत्य" सि॰कौ॰ । पतिव्रतापरत्वे संज्ञात्वात् तस्याभावः त्व "त्वतलोर्गुणवचनस्य" प्रा॰न पुंवत् सतीत्वम् "तेन नारद ! नारीणां सतीत्वमुपजायते" पुराणम् ।

**सतत** न॰ सम्+तन-क्त समोऽन्त्यलोपः । १निरन्तरे २तद्वति त्रि॰ अमरः । ["सतत्त्वतोऽन्यथा प्रथा" वेदा॰प॰ ।

**सतत्त्व** न॰ सह सदृशं तत्त्वेन । १स्वभावे हेमच॰ २यथार्थे

**सतानन्द** पु॰ गौतमपुत्रे अहल्यागर्भजे मुनिभेदे शब्दच॰ ।

**सतीन** पु॰ सतीं नयति नी-ड । १वंशभेदे शब्दच॰ (खुद्रमटर) २कलायभेदे भरतः । स्वार्थे क । तत्रैव अमरः ।

**सतीर्थ्य** पु॰ समाने तीर्थे गुरौ वसति यत् समानस्य सः । परस्परैकगुरुके छात्रे अमरः । इब॰। निर्यकारोऽप्ययमत्रार्थे । [व्याडिः । २वंशे हारा॰ ३वायौ रायमु॰ ।

**सतील** पु॰ सतीं लाययति लय-ड । (खुद्रमटर) १कलाये

**सतीलक** पु॰ सतील इव कायति कै-क, सह तिलेन तिलचिह्नेन कप् पृषो॰ दीर्घः । १वंशे (खुद्रमटर) २कलायभेदे च अमरः । [दीर्घः । कलायभेदे (तेओडा) अमरः ।

**सतीला** स्त्री सह तिलेन तिलचिह्नेन सहस्य सः पृषो॰

**सतेर** पु॰ सन-एर तान्तादेशः । सतुषे संक्षिप्तसा॰ ।

**सत्कदम्ब** पु॰ नित्यक॰ । केलिकदम्बे शब्दच॰ ।

**सत्कर्त्तृ** पु॰सत्+कृ-तृच् । १विष्णौ विष्णुस॰२सत्कारके त्रि॰।

**सत्कर्म्मन्** न॰ कर्म॰ । वेदादिविहिते यागादौ कर्मणि ।

**सत्काञ्चनार** पु॰कर्म॰ । रक्तकाञ्चने शब्दच॰। [स्त्रियां ङीष्

**सत्काण्ड** पुंस्त्री॰सत्काण्ड शब्दव्यापारोऽस्य । चिल्ले शब्दच॰

**सत्कार** पु॰ सत्+कृ-घञ् उप॰स॰ । १सम्मानने २पूजने च ।

**सत्कार्य्यवाद** पु॰ ६त॰। कार्य्यस्य सत्त्वनिर्णायके वादे कथाभेदे स च वादः उत्पत्तिशब्दे ११०८पृ॰ दृश्यः ।

**सत्कृत** त्रि॰ सत्+कृ-क्त । १पूजिते २कृतसम्माने च ।

**सत्क्रिया** स्त्री सत्+कृ-श । १सत्कारे २सम्मानने ३पूजने च

**सत्तम** त्रि॰ अतिशयेन सन् तमप् । अतिशयसाधौ अमरः ।

**सत्ता** स्त्री सतोभावः तल् । १द्रव्यगुणकर्मवृत्तौ २जातिभेदे "द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते" भाषा॰। जातिशब्दे ३०९३ पृ॰ दृश्यम् । ३विद्यमानतायाञ्च विद्यमानत्वं च कालसम्बन्धः । आत्मधारणानुकूलव्यापार इति शाब्दिकाः "आत्मानमात्मना विभ्रदस्तीति व्यपदिश्यते । अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः" हरिः ।

तत्र विद्यमानता च वेदान्तमते त्रिविधा पारमार्थिकी१ ब्रह्मणः त्रैकालिकाबाध्यत्वरूपा व्यावहारिकी२ घटादीनां सा च तत्त्वज्ञाननाश्या प्रातीतिकी३ शुक्तिरजतादेः सा चाधिष्ठानसाक्षात्कारनाश्या । ब्रह्मसत्तयैव सर्वेषां सत्ताव्यवहारः सदुत्पन्नत्वात् इति वेदान्तिनः ।

**सत्त्र** न॰ सद-ष्ट्रन् । १स्थाने २यज्ञभेदे ३सदादाने ४आच्छादने ५अरण्ये ६कैतवे मेदि॰ ७धने ८गृहे ९दाने १०सरसि नानार्थकोषः । सदादानञ्च सदक्षिणं सततान्नदानम् । यज्ञभेदश्च द्वादशाहादिसाध्यः ज्योतिष्टोमादिः यथोक्तं कात्या॰श्रौ॰१२।१।४। सूत्रभाष्यादौ "द्वादशाहः सत्त्रमहीनश्च"सू॰ "सत्त्ररूपः अहीनरूपश्च भवति द्विविधः ।